योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०९७

सप्तनवतितमः सर्गः ९७

श्रीवसिष्ठ उवाच ।

संविन्मयत्वाज्जगतः स्वप्नस्य परमात्मनः ।

ब्रह्माकाशतया सर्वं ब्रह्मैवेत्यनुभूयते ।। १

भ्रमस्य चातिदृश्यत्वाददृश्यत्वान्महाचितेः ।

मदशक्तिवदात्मेति सत्यतास्यापि युज्यते ।। २

असत्त्वाद्दृश्यविश्रान्तेरलभ्यत्वान्महाचितेः ।

उपलब्धुरभावाच्च शून्यनाम्नीव सत्यपि ।। ३

चिन्मात्रं पुरुषोऽकर्ता समेत्यव्यक्ततो जगत् ।

एवंदृष्टेः सत्यमेतदेवमर्थानुभूतितः ।। ४

विवर्तो ब्रह्मणो दृश्यमित्येवंवादिनोऽपि सत् ।

मतमेवंस्वरूपाणामर्थानामनुभूतितः ।। ५

परमाणुसमूहात्म जगदित्यपि सत्यतः ।

संवेद्यते यथा यद्यत्तत्तथैवानुभूतितः ।। ६

यथा दृष्टं तथैवेदमिह लोके परत्र च ।

नासन्न सदिति प्रौढा सत्यमाध्यात्मिकी गतिः ।। ७

बाह्यमेवास्ति नास्त्यन्यदित्यन्ये सत्यवादिनः ।

स्वात्मन्यक्षगणातीतं प्राप्नुवन्ति न ते यतः ।। ८

अनारतविपर्यासदर्शनात्क्षणभङ्गधीः ।

युक्तैव तद्विदामाद्यं सर्वशक्ति हि तत्पदम् ।। ९

कलविङ्कघटन्यायो धर्म इत्यपि तद्विदाम् ।

तथात्मसिद्धेर्म्लेच्छानां तद्देशेषु न दुष्यति ।। १०

समाः सन्तश्च विप्राग्निविषामृतमृतिष्वपि ।

भान्त्येवं तद्विदां सर्वमिदं सर्वात्मकं यतः ।। ११

स्वभावसिद्धमेवेदं युक्तमित्येव तद्विदाम् ।

अन्विष्टा याति नो प्राप्तिं बुद्धिमत्सर्वकर्तृता ।। १२

एकः सर्वत्र कर्तेति सत्यं तन्मयचेतसाम् ।

सोऽयं निश्चयवान्सोऽत्र तदाप्नोतीत्यबाधितम् ।।१३

अयं लोकः परश्चास्ति स्नानाग्न्यादि च नेतरत् ।

एतदेतादृशं सत्यं विद्धि भावितभावनम् ।। १४

अशेषं शून्यमेवेति बौद्धानामेतदेव सत् ।

लभ्यते तद्विचारेण यत्र किंचन नैव हि ।। १५

चितिश्चिन्तामणिरिव कल्पद्रुम इवेप्सितम् ।

आशु संपादयत्यन्तरात्मनात्मनि खात्मिका ।। १६

नेदं शून्यं न चाशून्यमित्यवस्तु न तद्विदाम् ।

सर्वशक्तिर्हि सा शक्तिर्न तद्विद्यत एव तत् ।। १७

तस्मात्स्वनिश्चये यस्मिन्यः स्थितः स तथा ततः ।

अवश्यं फलमाप्नोति न चेद्बाल्यान्निवर्तते ।। १८

विचार्य पण्डितैः सार्धं श्रेष्ठवस्तुनि धीमता ।

स रूढो निश्चयो ग्राह्यो नेतरत्र यथा तथा ।। १९

संभवत्युत्तमप्रज्ञः शास्त्रतो व्यवहारतः ।

यो यत्र नाम तत्रासौ पण्डितस्तं समाश्रयेत् ।। २०

सतां विवदमानानां सच्छास्त्रव्यवहारिणाम् ।

यः समाह्लादकोऽनिन्द्यः स श्रेष्ठस्तं समाश्रयेत् ।। २१

सर्व एवानिशं श्रेयो धावन्ति प्राणिनो बलात् ।

परिनिम्नं पयांसीव तद्विचार्य समाश्रयेत् ।। २२

कल्लोलैरुह्यमानानां नृणां संसारसागरे ।

अज्ञाता दिवसा यान्ति तृणानामिव बिन्दवः ।। २३

श्रीराम उवाच ।

जगत्पूर्वं लतेवापि विश्रान्ता वितते पदे ।

पूर्वापरविचारेण के पराभावदर्शिनः ।। २४

श्रीवसिष्ठ उवाच ।

जातौ जातौ कतिपये व्यपदेश्या भवन्ति ते ।

येषां यान्ति प्रकाशेन दिवसा भास्वतामिव ।। २५

अधश्चोर्ध्वं च धावन्तश्चक्रावर्तविवर्तनैः ।

सर्वे तृणवदुह्यन्ते मूढा मोहभवाम्बुधौ ।। २६

नष्टात्मस्थितयो भोगवह्निषु प्रज्वलन्त्यलम् ।

देवा दिवि दवेनाद्रौ दह्यमाना द्रुमा इव ।। २७

पातिता मदसंपन्ना दानवा दानवारिभिः ।

गजा इव निरालाना घोरे नारायणावटे ।। २८

न गन्धमपि गन्धर्वा दर्शयन्ति विवेकजम् ।

गीतपीतपरामर्शाः सरन्ति हरिणा इव ।। २९

विद्याधराश्च विद्यानामाधारत्वेन मोहिताः ।

स्फुरितानामुदाराणामपि कुर्वन्ति नादरम् ।। ३०

यक्षा विक्षोभितभुवो दक्षतामक्षता इव ।

दर्शयन्त्यसहायेषु बालवृद्धातुरेषु च ।। ३१

दन्तिनामिव मत्तानां रंहसा हरिणारिणा ।

कृतः करिष्यसि त्वं च राक्षसानां परिक्षयम् ।। ३२

भृशं पिशाचाः पश्यन्ति भूतभोजनचिन्तया ।

धूमान्धकारानिलया ज्वालयाहुतयो यथा ।। ३३

नागजालमृणालानि मग्नानि धरणीतले ।

नगानामिव मूलानि जडानीव स्थितान्यलम् ।। ३४

विवरं शरणं येषां कीटानामिव भूतले ।

तेषामसुरबालानां विवेकेषु कथैव का ।। ३५

अल्पमात्रकणार्थेन संचरन्ति दिवानिशम् ।

पिपीलिकासधर्माणः प्रायेण पुरुषा अपि ।। ३६

सर्वासां भूतजातीनां व्यग्राणां व्यर्थदीर्घया ।

क्षीबाणामिव गच्छन्ति दिवसानि दुरीहया ।। ३७

न कंचित्संस्पृशत्यन्तर्विवेको विमलो जनम् ।

जलेऽगाधे निपतितं निमज्जन्तं रजो यथा ।। ३८

नीयन्ते नियमाधूता मानवा मानवायुभिः ।

काम्पिकैः स्फुटतापूताः किरारुनिकरा इव ।। ३९

पानभोजनजम्बाले गहने योगिनीगणाः ।

दुर्गन्धपल्वलोद्गारे पतिताः पामरा इव ।। ४०

केवलं यमचन्द्रेन्द्ररुद्रार्कवरुणानिलाः ।

जीवन्मुक्ता हरिब्रह्मगुरुशुक्रानलादयः ।। ४१

प्रजापतीनां सप्तर्षिदक्षाद्याः कश्यपादयः ।

नारदाद्याः कुमाराद्याः सनकाद्याः सुरात्मजाः ।। ४२

दानवानां हिरण्याक्षबलिप्रह्लादशम्बराः ।

मयवृत्रान्धनमुचिकेशिपुत्रमुरादयः ।। ४३

बिभीषणाद्या रक्षस्सु प्रहस्तेन्द्रजिदादयः ।

शेषतक्षककर्कोटमहापद्मादयोऽहिषु ।। ४४

ब्रह्मविष्ण्विन्द्रलोकेषु वास्तव्या मुक्तदेहिनः ।

मुक्तस्वभावास्तुषिताः सिद्धाः साध्याश्च केचन ।। ४५

मानुषेषु च राजानो मुनयो ब्राह्मणोत्तमाः ।

जीवन्मुक्ताः संभवन्ति विरलास्तु रघूद्वह ।। ४६

भूतानि सन्ति सकलानि बहूनि दिक्षु

बोधान्वितानि विरलानि भवन्ति किंतु ।

वृक्षा भवन्ति फलपल्लवजालयुक्ताः

कल्पद्रुमास्तु विरलाः खलु संभवन्ति ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० निर्वाणप्रकरणे उ० विवेकिविरलत्ववर्णनं नाम सप्तनवतितमः सर्गः ।।९७।।